# Shivapujana Vaidika Shodashopachara

# શિવ પૂજન વૈદિક ષોડશોપચાર

## Document Information

Text title : shivavaidikaShoDachopachArapUjA

File name : shivavaidikaShoDachopachArapUjA.itx

Category : shiva, svara, veda, pUjA

Location : doc_shiva

Latest update : February 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 5, 2023

*sanskritdocuments.org*

# શિવ પૂજન વૈદિક ષોડશોપચાર

૧ ધ્યાનમ્ –

ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચન્દ્રાવતંસં
રત્નાકલ્પોજ્જ્વલાઙ્ગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ ।
પદ્માસીનં સમન્તાત્ સ્તુતમમરગણૈર્વ્યાઘ્રકૃત્તિં વસાનં
વિશ્વાદ્યં વિશ્વબીજં નિખિલભયહરં પઞ્ચવક્ત્રં ત્રિનેત્રમ્ ॥

ૐ નમસ્તે રુદ્ર મન્યવ ઉતોત ઇષવે નમઃ ।
નમસ્તે અસ્તુ ધન્વને બાહુભ્યામુત તે નમઃ ॥

૨ આસનમ્ –

યા તે રુદ્ર શિવા તનૂરઘોરાઽપાપકાશિની ।
તયા નસ્તનુવા શન્તમયા ગિરિશન્તાભિચાકશીહિ ॥

૩ પાદ્યમ્ –

યામિષું ગિરિશંત હસ્તે બિભર્ષ્યસ્તવે ।
શિવાં ગિરિત્ર તાં કુરુ મા હિꣳસીઃ પુરુષં જગત્ ॥

૪ અર્ઘ્યમ્ –

શિવેન વચસા ત્વા ગિરિશાચ્છાવદામસિ ।
યથા નઃ સર્વમિજ્જગદયક્ષ્મꣳ સુમના અસત્ ॥

૫ આચમનીયમ્ –

અધ્યવોચદધિવક્તા પ્રથમો દૈવ્યો ભિષક્ ।
અહીꣳશ્ચ સર્વાઞ્જમ્ભયન્ત્સર્વાશ્ચ યાતુધાન્યઃ ॥

૬ સ્નાનમ્ –

અસૌ યસ્તામ્રો અરુણ ઉત બભ્રુઃ સુમઙ્ગલઃ ।
યે ચેમાꣳ રુદ્રા અભિતો દિક્ષુ શ્રિતાઃ સહસ્રશોઽવૈષાꣳ હેડ ઈમહે ॥

૭ વસ્ત્રમ્ –

અસૌ યોઽવસર્પતિ નીલગ્રીવો વિલોહિતઃ ।

ઉતૈનં ગોપા અદૃશન્નદૃશન્નુદહાર્યઃ ॥

૮ યજ્ઞોપવીતમ્ –

નમો અસ્તુ નીલગ્રીવાય સહસ્રાક્ષાય મીઢુષે ॥

અથો યે અસ્ય સત્વાનોઽહં તેભ્યોઽકરન્ નમઃ ।

૯ ગન્ધમ્-ચન્દનમ્ –

પ્રમુઞ્ચ ધન્વનસ્ત્વ-મુભયોરાર્ત્નિયોર્જ્યામ્ ॥

યાશ્ચ તે હસ્ત ઇષવઃ પરા તા ભગવો વપ ।

૧૦ પુષ્પમ્ –

વિજ્યં ધનુઃ કપર્દિનો વિશલ્યો બાણવાઁ ઉત ॥

અનેશન્નસ્યેષવ આભુરસ્ય નિષઙ્ગથિઃ ।

૧૧ ધૂપમ્ –

યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે ધનુઃ ॥

તયાઽસ્માન્ વિશ્વતસ્ત્વમયક્ષ્મયા પરિબ્ભુજ ।

૧૨ દીપમ્ –

પરિ તે ધન્વનો હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ ॥

અથો ય ઇષુધિસ્તવારે અસ્મન્નિધેહિ તમ્ ।

૧૩ નૈવેદ્યમ્ –

અવતત્ય ધનુસ્તવઁ સહસ્રાક્ષ શતેષુધે ॥

નિશીર્ય શલ્યાનાં મુખા શિવો નઃ સુમના ભવ ।

૧૪ તામ્બૂલમ્ –

નમસ્તે અસ્ત્વાયુધાયાનાતતાય ધૃષ્ણવે ॥

ઉભાભ્યામુત તે નમો બાહુભ્યામ્ તવ ધન્વને ।

૧૫ પ્રદક્ષિણામ્ –

મા નો મહાન્તમુત મા નો અર્ભકં

મા ન ઉક્ષન્ત-મુત મા ન ઉક્ષિતમ્ ।

મા નોઽવધીઃ પિતરં મોત માતરં પ્રિયા મા

નસ્તનુવો રુદ્ર રીરિષઃ ॥ ૧૦-૫॥

૧૬ મન્ત્ર પુષ્પાઞ્જલીમ્ –

માનસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ

મા નો અશ્વેષુ રીરિષઃ ।

વીરાન્મા નો રુદ્ર ભામિતોઽવધી-ર્હવિષ્મન્તો

નમસા વિધેમ તે ॥ ૧૦-૬॥

---

*Shivapujana Vaidika Shodashopachara*

pdf was typeset on February 5, 2023

Please send corrections to *sanskrit@cheerful.com*